श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री-अभीतिस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री-अभीतिस्तवः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अभीतिरिह यज्जुषां यदवधीरितानां भयं
भयाभयविधायिनो जगति यन्निदेशे स्थिताः।
तदेतदतिलङ्घितद्रुहिणशम्भुशक्रादिकं
रमासखमधीमहे किमपि रङ्गधुर्यं महः॥ १ ॥

दयाशिशिरिताशया मनसि मे सदा जागृयुः
श्रियाऽध्युषितवक्षसः श्रितमरुद्वृधासैकताः।
जगद्दुरितघस्मरा जलधिडिम्भडम्भस्पृशः
सकृत्प्रणतरक्षणप्रथितसंविदः संविदः॥ २ ॥

यदद्य मितबुद्धिना बहुळमोहभाजा मया
गुणग्रथितकायवाङ्मनसवृत्तिवैचित्र्यतः।
अतर्कितहिताहितक्रमविशेषमारभ्यते
तदप्युचितमर्चनं परिगृहाण रङ्गेश्वर॥ ३ ॥

मरुत्तरणिपावकत्रिदशनाथकालादयः
स्वकृत्यमधिकुर्वते त्वदपराधतो बिभ्यतः।
महत् किमपि वज्रमुद्यतमिवेति यच्छ्रूयते
तरत्यनघ तद्भयं य इह तावकः स्तावकः॥ ४ ॥

भवन्तमिह यः स्वधीनियतचेतनाचेतनं
पनायति नमस्यति स्मरति वक्ति पर्येति वा।
गुणं कमपि वेत्ति वा तव गुणेश गोपायितुः
कदाचन कुतश्चन क्वचन तस्य न स्यात् भयम्॥ ५ ॥

www.prapatti.com

स्थिते मनसि विग्रहे गुणिनि धातुसाम्ये सति
स्मरेदखिलदेहिनं य इह जातुचित् त्वामजम्।
तयैव खलु सन्धया तमथ दीर्घनिद्रावशं
स्वयं विहितसंस्मृतिर्नयसि धाम नैःश्रेयसम्॥ ६ ॥

रमादयित रङ्गभूरमण कृष्ण विष्णो हरे
त्रिविक्रम जनार्दन त्रियुग नाथ नारायण।
इतीव शुभदानि यः पठति नामधेयानि ते
न तस्य यमवश्यता नरकपातभीतिः कुतः॥ ७ ॥

कदाचिदपि रङ्गभूरसिक यत्र देशे वशी
त्वदेकनियताशयस्त्रिदशवन्दितो वर्तते।
तदक्षततपोवनं तव च राजधानी स्थिरा
सुखस्य सुखमास्पदं सुचरितस्य दुर्गं महत्॥ ८ ॥

त्रिवर्गपथवर्तिनां त्रिगुणलङ्घनोद्योगिनां
द्विषत्प्रमथनार्थिनामपि च रङ्गदृश्योदयाः।
स्खलत्समयकातरीहरणजागरूकाः प्रभो
करग्रहणदीक्षिताः क इव ते न दिव्या गुणाः॥ ९ ॥

बिभेति भवभृत् प्रभो त्वदुपदेशतीव्रौषधात्
कदध्वरसदुर्विषे बलिशभक्षवत् प्रीयते।
अपथ्यपरिहारधीविमुखमित्थमाकस्मिकी
तमप्यवसरे क्रमादवति वत्सला त्वद्दया॥ १० ॥

अपार्थ इति निश्चितः प्रहरणादियोगस्तव
स्वयं वहसि निर्भयस्तदपि रङ्गपृथ्वीधर।
स्वरक्षणमिवाभवत् प्रणतरक्षणं तावकं
यदात्थ परमार्थविन्नियतमन्तरात्मेति ते॥ ११ ॥

लघिष्ठसुखसङ्गदैः स्वकृतकर्मनिर्वर्तितैः
कळत्रसुतसोदरानुचरबन्धुसम्बन्धिभिः।



www.prapatti.com

धनप्रभृतिकैरपि प्रचुरभीतिभेदोत्तरैः
न बिभ्रति धृतिं प्रभो त्वदनुभूतिभोगार्थिनः॥ १२॥

न वक्तुमपि शक्यते नरकगर्भवासादिकं
वपुश्च बहुधातुकं निपुणचिन्तने तादृशम्।
त्रिविष्टपमुखं तथा तव पदस्य देदीपतः
किमत्र न भयास्पदं भवति रङ्गपृथ्वीपते॥ १३॥

भवन्ति मुखभेदतो भयनिदानमेव प्रभो
शुभाशुभविकल्पिता जगति देशकालादयः।
इति प्रचुरसाध्वसे मयि दयिष्यसे त्वं न चेत्
क इत्थमनुकम्पिता त्वदनुकम्पनीयश्च कः॥ १४॥

सकृत्प्रपदनस्पृशामभयदाननित्यव्रती
न च द्विरभिभाषसे त्वमिति विश्रुतः स्वोक्तितः।
यथोक्तकरणं विदुस्तव तु यातुधानादयः
कथं वितथमस्तु तत् कृपणसार्वभौमे मयि॥ १५॥

अनुक्षणसमुत्थिते दुरितवारिधौ दुस्तरे
यदि क्वचन निष्कृतिर्भवति साऽपि दोषाविला।
तदित्थमगतौ मयि प्रतिविधानमाधीयतां
स्वबुद्धिपरिकल्पितं किमपि रङ्गधुर्य त्वया॥ १६॥

विषादबहुळादहं विषयवर्गतो दुर्जयात्
बिभेमि वृजिनोत्तरस्त्वदनुभूतिविच्छेदतः।
मया नियतनाथवानयमिति त्वमर्थापयन्
दयाधन जगत्पते दयितरङ्ग संरक्ष माम्॥ १७॥

निसर्गनिरनिष्टता तव निरंहसः श्रूयते
ततस्त्रियुग सृष्टिवत् भवति संहृतिः क्रीडितम्।
तथाऽपि शरणागतप्रणयभङ्गभीतो भवान्
मदिष्टमिह यद्भवेत् किमपि मा स्म तज्जीहपत्॥ १८॥



www.prapatti.com

कयाधुसुतवायसद्विरदपुङ्गवद्रौपदी-
    विभीषणभुजङ्गमव्रजगणाम्बरीषादयः।
भवत्पदसमाश्रिता भयविमुक्तिमापुर्यथा
    लभेमहि तथा वयं सपदि रङ्गनाथ त्वया॥ १९ ॥

भयं शमय रङ्गधाम्नयनितराभिलाषस्पृशां
    श्रियं बहुळय प्रभो श्रितविपक्षमुन्मूलय।
स्वयं समुदितं वपुस्तव निशामयन्तः सदा
    वयं त्रिदशनिर्वृतिं भुवि मुकुन्द विन्देमहि॥ २० ॥

श्रियः परिबृढे त्वयि श्रितजनस्य संरक्षके
    सदद्भुतगुणोदधाविति समर्पितोऽयं भरः।
प्रतिक्षणमतः परं प्रथय रङ्गधामादिषु
    प्रभुत्वमनुपाधिकं प्रथितहेतिभिर्हेतिभिः॥ २१ ॥

कलिप्रणिधिलक्षणैः कलितशाक्यलोकायतैः
    तुरुष्कयवनादिभिर्जगति जृम्भमाणं भयम्।
प्रकृष्टनिजशक्तिभिः प्रसभमायुधैः पञ्चभिः
    क्षितित्रिदशरक्षकैः क्षपय रङ्गनाथ क्षणात्॥ २२ ॥

दितिप्रभवदेहभिद्दहनसोमसूर्यात्मकं
    तमःप्रमथनं प्रभो समुदितास्त्रबृन्दं स्वतः।
स्ववृत्तिवशवर्तितत्रिदशवृत्ति चक्रं पुनः
    प्रवर्तयतु धाम्नि ते महति धर्मचक्रस्थितिम्॥ २३ ॥

मनुप्रभृतिमानिते महति रङ्गधामादिके
    दनुप्रभवदारुणैर्दरमुदीर्यमाणं परैः।
प्रकृष्टगुणक श्रिया वसुधया च सन्धुक्षितः
    प्रयुक्तकरुणोदधिः प्रशमय स्वशक्त्या स्वयम्॥ २४ ॥

भुजङ्गमविहङ्गमप्रवरसैन्यनाथाः प्रभो
    तथैव कुमुदादयो नगरगोपुरद्वारपाः।

अचिन्त्यबलविक्रमास्त्वमिव रङ्गसंरक्षकाः
जितं त इति वादिनो जगदनुग्रहे जाग्रतु॥ २५ ॥

विधिस्त्रिपुरमर्दनस्त्रिदशपुङ्गवः पावकः
यमप्रभृतयोऽपि यद्विमतरक्षणे न क्षमाः।
रिरक्षिषति यत्र च प्रतिभयं न किञ्चित् क्वचित्
स नः प्रतिभटान् प्रभो शमय रङ्गधामादिषु॥ २६ ॥

स कैटभतमोरविर्मधुपरागझञ्झामरुत्
हिरण्यगिरिदारणस्त्रुटितकालनेमिद्रुमः।
किमत्र बहुना भजद्भवपयोधिमुष्टिन्धयः
त्रिविक्रम भवत्क्रमः क्षिपतु मङ्क्षु रङ्गद्विषः॥ २७ ॥

यतिप्रवरभारतीरसभरेण नीतं वयः
प्रफुल्लपलितं शिरः परमिह क्षमं प्रार्थये।
निरस्तरिपुसम्भवे क्वचन रङ्गमुख्ये विभो
परस्परहितैषिणां परिसरेषु मां वर्तय॥ २८ ॥

प्रबुद्धगुरुवीक्षणप्रथितवेङ्कटेशोद्भवाम्
इमामभयसिद्धये पठत रङ्गभर्तुः स्तुतिम्।
भयं त्यजत भद्रमित्यभिदधत् स वः केशवः
स्वयं घनघृणानिधिर्गुणगणेन गोपायति॥ २९ ॥

॥ इति श्री-अभीतिस्तवः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com